गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। वात्स्यश्च वात्स्यायनश्च वात्स्यौ। वृद्धः इति किम्? गर्गश्च गार्ग्यायणश्च गर्गगार्ग्यायणौ। यूना इति किम्? [1]गार्ग्यश्च गर्गश्च गार्ग्यगर्गौ। [2]तल्लक्षणः इति किम्? गार्ग्यवात्स्यायनौ। एवकारः किमर्थः? भागवित्तिश्च भागवित्तिकश्च भागवित्तिभागवित्तिकौ। [3]कुत्सा सौवीरत्वं च [4]भागवित्तिकस्यापरो विशेषो विद्यते ॥

## स्त्री पुंवच्च। (६६/९३२)

शेषः इति वर्तते, वृद्धो यूना [5]इति च सर्वम्। स्त्री वृद्धा यूना सहवचने शिष्यते, तल्लक्षणश्चेदेव विशेषो भवति[6]। पुंसः [7]इवास्याः कार्यं भवति। स्त्र्यर्थः पुमर्थवद् भवति[8]। गार्गी च गार्ग्यायणश्च गार्ग्यौ। वात्सी च वात्स्यायनश्च वात्स्यौ। दाक्षी च दाक्षायणश्च [9]दाक्षी ॥

## पुमान् स्त्रिया। (६७/९३३)

तल्लक्षणश्चेदेव विशेषः इति वर्तते। वृद्धो यूना इति निवृत्तम्। स्त्रिया सहवचने पुमान् शिष्यते [10]स्त्री निवर्तते। [11]स्त्रीपुंसलक्षणश्चेदेव विशेषो भवति। ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ। कुक्कुटश्च कुक्कुटी च कुक्कुटौ[12]। तल्लक्षणश्चेदेव विशेष इत्येव। [13]कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ। एवकारः किमर्थः? इन्द्रश्च इन्द्राणी च इन्द्रेन्द्राण्यौ। 'पुंयोगादाख्यायाम्' (४.१.४८/५०४) इत्यपरो विशेषः। पुमान् इति किम्? प्राक् च प्राची च प्राक्प्राच्यौ। प्राक् इत्यव्ययमलिङ्गम् ॥

## भ्रातृपुत्रौ स्वसृदुहितृभ्याम्। (६८/९३४)

यथासङ्ख्यं [14]भ्रातृपुत्रशब्दौ शिष्येते सहवचने स्वसृदुहितृभ्याम्। स्वस्रा सहवचने भ्रातृशब्दः शिष्यते। भ्राता च स्वसा च भ्रातरौ। दुहित्रा सहवचने पुत्रशब्दः शिष्यते। पुत्रश्च दुहिता च पुत्रौ ॥

## नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्। (६९/९३५)

तल्लक्षणश्चेदेव विशेषः इति वर्तते। नपुंसकानपुंसकमात्रकृते विशेषेऽनपुंसकेन सहवचने नपुंसकं शिष्यते, [15]एकवच्चास्य कार्यं भवति अन्यतरस्याम्। शुक्लश्च कम्बलः, शुक्ला च बृहतिका, शुक्लं च वस्त्रं, तदिदं शुक्लम्। तानि इमानि शुक्लानि (म.भा. १.२४९)। अनपुंसकेन इति किम्? शुक्लं च शुक्लं च शुक्लं च शुक्लानि[16]। एकवच्च [17]इति न भवति ॥

## पिता मात्रा। (७०/९३६)

अन्यतरस्याम् इति वर्तते, [18]न एकवत् इति। मात्रा सहवचने पितृशब्दः शिष्यते[19]ऽन्यतरस्याम्। [20]माता च पिता च पितरौ, मातापितरौ [21]इति वा ॥

---

1. गार्ग्यश्च गर्गश्च नास्ति ड. हृ. अ, गार्ग्यगर्गौ नास्ति फ. 2. तल्लक्षणश्चेदिति ड. अ. क. 3. कुत्सनं हृ. 4. भागवित्तिशब्दस्य फ, भागवित्तिकस्यापरौ विशेषौ विद्येते हृ. 5. तल्लक्षणः इति च सर्वं हृ. 6. स्त्रीपुंसलक्षणे एव चेद् विशेषौ भवतः इत्यर्थः इत्यधिकम् फ, विशेषो वर्तते भवतीत्यर्थः हृ. 7. एवास्याः ड, चास्याः क. 8. इति इत्यधिकम् क. फ, इति यावत् इत्यधिकम् हृ. 9. दाक्षौ ड, दाक्ष्यौ अ. 10. स्त्री निवर्तते नास्ति फ. ग. हृ. 11. स्त्रीपुंलिङ्गलक्षणः अ. ड. 12. मयूरः च मयूरी च मयूरौ इत्यधिकम् फ. 13. कुक्कुटश्च मयूरौ च नास्ति फ. 14. भ्रातृपुत्रौ ड. फ. हृ. 15. एकं च ग. 16. वस्त्राणि इत्यधिकम् ग. 17. इति नास्ति फ. हृ. 18. तेनैकवत् हृ. 19. अन्यतरस्याम् नास्ति फ, अन्यतरस्यामिति फ. 20. पिता च माता च पितरौ क.ड.हृ. 21. इति वा नास्ति फ, इति च ब.ड.